# व्याकरणपाठयोजना

विद्यालयस्य नाम.................. विषयः - संस्कृतम् (व्याकरणम्) दिनाङ्कः ...............

कक्षा - अष्टमी, वर्ग ............. प्रकरणम् - 'गुणसन्धिः' कालांशः ...............

छात्राध्यापकस्य/ अवधिः ...............

छात्राध्यापिकायाः नाम ..................................

छात्रसंख्या .............., मध्यायुः ......................

---

**सामान्योद्देश्यानि –**

1. संस्कृतव्याकरणे अभिरुच्युत्पादनम्।
2. व्याकरणस्य प्रयोगे प्रेरणासम्पादनम्।
3. पदानां सन्धान-विभजन ज्ञानोत्पादनम्।
4. रचनाशक्तेः वर्धनम्।
5. चतुर्षु कौशलेषु सामर्थ्यसम्पादनम्।

**विशिष्टोद्देश्यानि –**

1. गुणसन्धि परिचयः।
2. गुणसन्धिः पूर्वपरवर्णयोः एकादेशरूपः इति ज्ञापनम्।
3. गुणवर्णाः के इति बोधनम्।
4. पाठ्यपुस्तके विद्यमानेषु विभिन्नपाठेषु गुणसन्धियुक्तपदानामन्वेषणाय प्रोत्साहनम्।

**सहायकोपकरणानि –**

श्यामपट्टः, सुधाखण्डाः, मार्जनी, सङ्केतयष्टिः, वर्णचित्राणि।

**पूर्वज्ञानम् –**

छात्राः दीर्घसन्धिं सम्यक् जानन्ति।

Scanned with CamScanner

**प्रस्तावना –**

अध्यापक:/अध्यापिका 'ज्ञातात् अज्ञातं प्रति', 'सरलात् कठिनं प्रति' इत्यादि शिक्षणसूत्राण्यनुसृत्य छात्रै: ज्ञातं दीर्घसन्धिं स्मारयन्/स्मारयन्ती अज्ञातं गुणसन्धिं प्रत्यभिप्रेरयति।

अध्यापक: - कवीन्द्र: कवितां पठति।

वाक्येऽस्मिन् सन्धियुक्तं पदं किम् ?

छात्र: - कवीन्द्र:।

अध्यापक: - कवीन्द्र: इति पदं विभजत।

छात्र: - कवि + इन्द्र:।

अध्यापक: - क: सन्धि: ?

छात्र: - दीर्घसन्धि:।

अध्यापक: - भानूदय: विद्याभ्यास:, अद्यापि इमानि पदानि विभजत।

छात्र: - भानु + उदय:, विद्या + अभ्यास:, अद्य + अपि।

अध्यापक: - अत्र विद्या + अभ्यास: इत्यत्र पूर्वपदस्यान्तिम वर्ण: क: ?

छात्र: - आ।

अध्यापक: - अभ्यास इत्यत्र आदिमवर्ण: क: ?

छात्र: - अ।

अध्यापक: - अ + आ अनयो: स्थाने एकादेश: क: ?

छात्र: - दीर्घ: 'आ' इति वर्ण:।

अ/आ + इ/ई =

अध्यापक: - अ + इ अनयो: स्थाने एकादेश: वर्ण: क: ?

छात्रा: - न जानीम:।

**उद्देश्यकथनम् –**

अकारात् परं अकार: भवति चेत् सवर्णदीर्घसन्धि: भवति। अकारात् परं इ, उ, ऋ, ऌ वर्णा: भवन्ति चेद् गुण: भवति – इति अद्य वयम् उदाहरणै: गुणसन्धिं ज्ञास्याम:।

**प्रस्तुतीकरणम् –**

अध्यापक:/अध्यापिका उदाहरणानि प्रस्तौति, तानि छात्रै: वाचयति। तत: पदच्छेदाय प्रेरयति पूर्वोत्तरपदयो: अन्तिमादिमवर्णौ ज्ञापयति तयो: स्थाने एकादेश: इति बोधयति।

1. स्वर्गे देवेन्द्र: राजा।
2. अद्य देशे महोत्सव: वर्तते।
3. सप्तर्षय: के ?
4. गङ्गोदकम् पवित्रं भवति।
5. नारद: देवर्षि:।

अध्यापक: - प्रथमवाक्ये सन्धियुक्तं पदं किम् ?

छात्र: - देवेन्द्र:।

अध्यापक: - देवेन्द्र: इति पदं विभजत।

छात्र: - देव + इन्द्र:।

अध्यापक: - देव् अ + इन्द्र:

पूर्वपदे अन्तिमवर्ण: क: ?

छात्र: - वकारोत्तरवर्ती वर्ण: अकार:।

अध्यापक: - इन्द्र इत्युत्तरपदस्यादिमवर्ण: क: ?

छात्र: - इकार:।

अध्यापक: - अ + इ = अनयो: पूर्वपरयो: स्थाने क: वर्ण: ?

छात्र: - एकार:



Scanned with CamScanner

अध्यापकः - अ + इ = ए, देव् अ + इ न्द्रः = देवेन्द्रः

ए

अध्यापकः - द्वितीयं वाक्यं पठतु।

छात्रः - पठति।

अध्यापकः - सन्धियुक्तं पदं किम् ?

छात्रः - महोत्सवः।

अध्यापकः - विभजनं कुरु।

छात्रः - महा + उत्सवः।

अध्यापकः - पूर्वपदस्यान्तिमवर्णः कः ?

छात्रः - आ।

अध्यापकः - उत्तरपदस्यादिमवर्णः कः ?

छात्रः - उ।

अध्यापकः - आ + उ = अनयोः पूर्वपरयोः स्थाने एकादेशः वर्णः कः ?

छात्रः - ओ।

अध्यापकः - मह् आ + उ त्सवः = महोत्सवः।

ओ

अध्यापकः - तृतीयं वाक्यं पठतु।

छात्रः - पठति।

अध्यापकः - सन्धिपदं दर्शय।

छात्रः - 'सप्तर्षयः

अध्यापकः - सन्धिपदं विभज्य दर्शय।

छात्रः - सप्त + ऋषयः



Scanned with CamScanner

अध्यापकः - पूर्वपदस्यान्तिमवर्णः कः?

छात्रः - अकारः।

अध्यापकः - उत्तरपदस्यादिमवर्णः कः?

छात्रः - ऋकारः।

अध्यापकः - अ + ऋकार अनयोः स्थाने एकादेशः वर्णः कः?

छात्राः - न जानन्ति।

अध्यापकः - अ + ऋ सप्त् अ + ऋ षयः = सप्तर्षयः

अर्

अ + ऋ इत्यनयोः स्थाने एकादेशवर्णः 'अर्' भवति।

अध्यापकः - चुतर्थं वाक्यं पठतु।

छात्रः - पठति।

अध्यापकः - सन्धियुक्तं पदं विभज्य दर्शय।

छात्रः - गङ्गोदकम् गङ्गा + उदकम्।

अध्यापकः - पूर्वपदस्यान्तिमवर्णः कः?

छात्रः - आकारः।

अध्यापकः - उत्तरपदस्यादिमवर्णः कः?

छात्रः - उकारः।

अध्यापकः - आकार + उकार इत्यनयोः पूर्वपरयोः स्थाने एकादेशवर्णः कः?

छात्रः - ओकारः।

अध्यापकः - सन्धिकार्यं लिखित्वा दर्शय।

छात्रः - निर्दिष्टः छात्रः श्यामफलके लिखति - गङ्ग् आ + उ दकम् = गङ्गोदकम्

ओ

Scanned with CamScanner

अध्यापकः - पञ्चमं वाक्यं पठतु।

छात्रः - पठति –

अध्यापकः - सन्धियुक्तं पदं किम्?

छात्रः - देवर्षिः।

अध्यापकः - विभज्य दर्शय।

छात्रः - देव + ऋषिः।

अध्यापकः - पूर्वपदस्यान्तिमवर्णः कः उत्तरपदस्यादिमवर्णः च कः?

छात्रः - अ + ऋ

अध्यापकः - अनयोः पूर्वपरयोः स्थाने कः एकादेश वर्णः?

छात्रः - 'अर्'

अध्यापकः - पश्यत - देव् अ + ऋ षिः = देवर्षिः

अर्

**श्यामफलकसारः–** अध्यापकः/अध्यापिका सारिणीं प्रदर्श्य उदाहरणैः पुनरेकबारं गुणवर्णान् बोधयति-

| पदम् | विभजनम् | पूर्वपदस्यान्तिमवर्णः | + | उत्तरपदस्यादिमवर्णः | = | एकादेशः गुणवर्णः |
|---|---|---|---|---|---|---|
| नेच्छति | न + इच्छति | अ | + | इ | = | ए |
| महेश्वरः | महा + ईश्वरः | आ | + | ई | = | ए |
| गुणोपेतम् | गुण + उपेतम् | अ | + | उ | = | ओ |
| गङ्गोर्मिः | गङ्गा + ऊर्मिः | आ | + | ऊ | = | ओ |
| देवर्षिः | देव + ऋषिः | अ | + | ऋ | = | अर् |
| राजर्षिः | राजा + ऋषिः | आ | + | ऋ | = | अर् |

| | |
|---|---|
| अ/आ + इ/ई = | ए |
| अ/आ + उ/ऊ = | ओ |
| अ/आ + ऋ/ॠ = | अर् |



Scanned with CamScanner

**सामान्यीकरणम् –**

अध्यापकः - पूर्वोक्तोदाहरणानाम् आधारेण नियमं वदन्तु।

छात्रः - अकारात् परं इ उ ऋ भवन्ति चेद् ए ओ अर् इति गुणः एकादेशः भवति।

अध्यापकः - एकादेशः कुत्र भवति?

छात्रः - पूर्वोत्तरपदयोः स्थाने

**नियमनम्/नियमीकरणम् –**

अध्यापकः - आद्गुणः इति सूत्रं वृत्तिश्च परिचाययति।

छात्राः - स्वनिष्कर्षसूत्रं पाणिनीयसूत्रञ्च तुलनात्मकतया परिशीलयन्ति।

**प्रयोगः –**

अध्यापकः - पठितांशस्य स्पष्टीकरणार्थम् गुणसन्धियुक्तानां पदानामभ्यासं छात्रैः कारयति।

उपेन्द्रः = .......... + ..........

गुणोपभोगः = .......... + ..........

ब्रह्मर्षिः = .......... + ..........

गङ्गाः + .......... = गङ्गोदकम्

.......... + उत्तरम् = प्रश्नोत्तरम्

देव + .......... = देवर्षिः

.......... + .......... = नेच्छति

**मूल्यांकनम् –**

अध्यापकः/अध्यापिका गुणसन्धेः निमित्तं, एकादेश इत्यस्यावबोधनं, गुणवर्णानामभिज्ञानं छात्रैः विहितं न वेति प्रश्नोत्तरमाध्यमेन ज्ञास्यति।

1. गुणः कदा भवति?
2. पूर्वपरवर्णौ कौ भवतः सोदाहरणं वद
3. गुणवर्णाः के?
4. नूतनान्युदाहरणानि वद



Scanned with CamScanner

**गृहकार्यम् –**

1. अधोलिखितानि पदानि विभजत

   कक्षोचितम्, वसन्तर्तुः, महोपाध्यायः, नगेशः

2. दीर्घसन्धिः गुणसन्धिः अनयोः को भेदः

   उदाहरणैः स्पष्टयत

3. स्वपाठ्यपुस्तकस्थ पाठेभ्यः गुणसन्धियुक्तानि पदानि चित्वा लिखत।

Scanned with CamScanner